# .. Shri Rama ApaduddhAraka stotram ..

# ॥ श्री राम आपदुद्धारक स्तोत्रम् ॥

आपदामपहर्तारं दातारं सर्वसंपदां
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ।
नमः कोदंडहस्ताय संधीकृतशराय च
दंडिताखिलदैत्याय रामायापन्निवारिणे ॥ १॥
आपन्नजनरक्षैकदीक्षायामिततेजसे ।
नमोऽस्तु विष्णवे तुभ्यं रामायापन्निवारिणे ॥ २॥
पदाम्भोजरजस्पर्शपवित्रमुनियोषिते ।
नमोऽस्तु सीतापतये रामायापन्निवारिणे ॥ ३॥
दानवेंद्रमहामत्तगजपंचास्यरूपिणे ।
नमोऽस्तु रघुनाथाय रामायापन्निवारिणे ॥ ४॥
महिजाकुचसंलग्नकुंकुमारुणवक्षसे ।
नमः कल्याणरूपाय रामायापन्निवारिणे ॥ ५॥
पद्मसम्भवभूतेशमुनिसंस्तुतकीर्तये ।
नमो मार्तांडवंश्याय रामायापन्निवारिणे ॥ ६॥
हरत्यार्तिं च लोकानां यो वा मधुनिषूधनः ।
नमोऽस्तु हरये तुभ्यं रामायापन्निवारिणे ॥ ७॥
तापकारणसंसारगजसिंहस्वरूपिणे ।
नमो वेदांतवेद्याय रामायापन्निवारिणे ॥ ८॥
रंगत्तरंगजलधिगर्वहृच्छरधारिणे ।
नमः प्रतापरूपाय रामायापन्निवारिणे ॥ ९॥
दारोपहितचंद्रावतंसध्यातस्वमूर्तये ।
नमः सत्यस्वरूपाय रामायापन्निवारिणे ॥ १०॥
तारानायकसंकाशवदनाय महौजसे ।
नमोऽस्तु ताटकाहंत्रे रामायापन्निवारिणे ॥ ११॥
रम्यसानुलसच्चित्रकूटाश्रमविहारिणे ।
नमस्सौमित्रिसेव्याय रामायापन्निवारिणे ॥ १२॥
सर्वदेवाहितासक्त दशाननविनाशिने ।
नमोऽस्तु दुःखध्वंसाय रामायापन्निवारिणे ॥ १३॥
रत्नसानुनिवासैक अंद्यपादाम्बुजाय च ।
नमस्त्रैलोक्यनाथाय रामायापन्निवारिणे ॥ १४॥
संसारबंध मोक्षैकहेतुदामप्रकाशिने ।
नमः कलुषसंहर्त्रे रामायापन्निवारिणे ॥ १५॥

पवनाशुगसंक्षिप्तमारीचादिसुरारये ।
नमो मखपरित्रात्रे रामायापन्निवारिणे ॥ १६ ॥
दाम्भिकेतरभक्तौघमहानंदप्रदायिने ।
नमः कमलनेत्राय रामायापन्निवारिणे ॥ १७ ॥
लोकत्रयोद्वेगकरकुम्भकर्णशिरश्छिदे ।
नमो नीरददेहाय रामायापन्निवारिणे ॥ १८ ॥
काकासुरैकनयनहरल्लीलास्त्रधारिणे ।
नमो भक्तैकवेद्याय रामायापन्निवारिणे ॥ १९ ॥
भिक्षुरूप समाक्रांतबलिसर्वैकसंपदे ।
नमो वामनरूपाय रामायापन्निवारिणे ॥ २० ॥
राजीवनेत्रसुस्पंदरुचिरांगसुरोचिषे ।
नमः कैवल्यनिधये रामायापन्निवारिणे ॥ २१ ॥
मंदमारुतसंवीतमंदारद्रुमवासिने ।
नमः पल्लवपादाय रामायापन्निवारिणे ॥ २२ ॥
श्रीकंठचापदलनधुरीणबलबाहवे ।
नमः सीतानुषक्ताय रामायापन्निवारिणे ॥ २३ ॥
राजराजसुहृद्योषार्चितमंगलमूर्तये ।
नम इक्ष्वाकुवंश्याय रामायापन्निवारिणे ॥ २४ ॥
मंजुलादर्शविप्रेक्षणोत्सुकैकविलासिने ।
नमः पालितभक्ताय रामायापन्निवारिणे ॥ २५ ॥
भूरिभूधरकोदंडमूर्तिध्येयस्वरूपिणे ।
नमोऽस्तु तेजोनिधये रामायापन्निवारिणे ॥ २६ ॥
योगींद्रहृत्सरोजातमधुपाय महात्मने ।
नमो राजाधिराजाय रामायापन्निवारिणे ॥ २७ ॥
भूवराहस्वरूपाय नमो भूरिप्रदायिने ।
नमो हिरण्यगर्भाय रामायापन्निवारिणे ॥ २८ ॥
योषांजलिविनिर्मुक्त लाजांचितवपुष्मते ।
नमस्सौंदर्यनिधये रामायापन्निवारिणे ॥ २९ ॥
नखकोटिविनिर्भिन्नदैत्याधिपतिवक्षसे ।
नमो नृसिंहरूपाय रामायापन्निवारिणे ॥ ३० ॥
मायामानुषदेहाय वेदोद्धरणहेतवे ।
नमोऽस्तु मत्स्यरूपाय रामायापन्निवारिणे ॥ ३१ ॥
मितिशून्य महादिव्यमहिम्ने मानितात्मने ।
नमो ब्रह्मस्वरूपाय रामायापन्निवारिणे ॥ ३२ ॥
अहंकारेतरजनस्वांतसौधविहारिणे ।
नमोऽस्तु चित्स्वरूपाय रामायापन्निवारिणे ॥ ३३ ॥

सीतालक्ष्मणसंशोभिपार्श्वाय परमात्मने ।
नमः पट्टाभिषिक्ताय रामायापन्निवारिणे ॥ ३४॥
आपदामपहर्तारं दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ३५॥

फलश्रुति

इमं स्तवं भगवतः पठेद्यः प्रीतमानसः ।
प्रभाते वा प्रदोषे वा रामस्य परमात्मनः ॥ १॥
सतु तीर्त्वा भवाम्भोधिमापदस्सकला अपि ।
रामसायुज्यमाप्नोति देवदेवप्रसादतः ॥ २॥
कारागृहादिबाधासु संप्राप्तेबहुसंकटे ।
अपन्निवारकस्तोत्रं पठेद्यस्तु यथाविधि ॥ ३॥
संयोज्यानुष्टभं मंत्रमनुश्लोकं स्मरन् विभुम् ।
सप्ताहात्सर्वबाधाभ्यो मुच्यते नात्र संशयः ॥ ४॥
द्वात्रिंशद्वारजपतः प्रत्यहं तु दृढव्रतः ।
वैशाखे भानुमालोक्य प्रत्यहं शतसंख्यया ॥ ५॥
धनवान् धनदप्रख्यस्स भवेन्नात्र संशयः ।
बहुनात्र किमुक्तेन यं यं कामयते नरः ॥ ६॥
तं तं काममवाप्नोति स्तोत्रेणानेन मानवः ।
यंत्रपूजाविधानेन जपहोमादितर्पणैः ॥ ७॥
यस्तु कुर्वीत सहसा सर्वान् कामानवाप्नुयात् ।
इह लोके सुखी भूत्वा परे मुक्तो भविष्यति ॥ ८॥

Proofread by KSR Ramachandran ramachandran underscore ksr at yahoo.ca

---

Please send corrections to sanskrit@cheerful.com
Last updated May 8, 2015
http://sanskritdocuments.org